# Shri Shrishankara Stotram

# શ્રી શ્રીશઙ્કરસ્તોત્રમ્

## Document Information

Text title : Shankara Stotram

File name : shankarastotram3.itx

Category : shiva

Location : doc_shiva

Transliterated by : Vani V

Proofread by : Vani V

Latest update : March 19, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2022

*sanskritdocuments.org*

Shri Shrishankara Stotram

# શ્રી શ્રીશઙ્કરસ્તોત્રમ્

સર્વેશ્વરં સર્વમન્તવીર્યં વિશ્વાર્તિનાશં ગિરિશં સુરેશમ્ ।
ગુણૈર્વિહીનં ત્રિગુણાત્મકં ચ નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૧॥

વારાણસીક્ષેત્ર-વિહારદક્ષં ત્રિલોકવન્દ્યં હરિભક્તાન્તમ્ ।
જગદ્ગુરું સંયમિનં દયાલું નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૨॥

ગઙ્ગોર્મિશોભં દ્વિજરાજમૌલિં શુદ્ધપ્રદીપ્તં રુચિરાસ્થિમાલમ્ ।
જટાધરં ભસ્મવિભૂષિતાઙ્ગં નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૩॥

કટોપિનદ્ધાજિનમાદિદેવં હલાહલાદં પિતૃકાનનસ્થમ્ ।
કરાક્ષસૂત્રં વૃષરાજકેતં નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૪॥

ગૌરીપ્રિયં દક્ષમખાન્તમાદ્યં કારુણ્યપૂર્ણં ભવભીતિનાશમ્ ।
પાપૌઘનાશં સ્મરવિગ્રહાન્તં નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૫॥

વાણેશ્વરં વહ્નિરવીન્દુનેત્રં ભીમં મૃડં શાન્તગુણાદિભૂષમ્ ।
સ્વયમ્ભુવં દૂરિતકાલભીતિં નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૬॥

કૈલાસનાથં પ્રમથાધિનાથં સુરાસુરૈર્ચિતપાદયુગ્મમ્ ।
તેજોમયં શૂલપિનાકપાણિં નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૭॥

દુઃખાન્તકં સર્વસુખસ્વરૂપમભવ્યશીલં શિવદં શિવેશમ્ ।
મૃત્યુઞ્જયં મૃત્યુપતેઃ કૃતાન્તં નમામિ તં જ્ઞાનદયં મહેશમ્ ॥ ૮॥

પ્રસીદ શમ્ભો ! હર ! રુદ્ર ! ભદ્ર ! સ્કન્દાશિવધ્વંસપિતઃ શરણ્ય ।
ભૂદેવવંશપ્રભવે કુબુદ્ધૌ રામેન્દ્રનાથે મયિ રુદ્રનાથ ! ॥ ૯॥

ઇતિ શ્રી શ્રીશઙ્કરસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Vani V.

*Shri Shrishankara Stotram*

pdf was typeset on March 19, 2022

Please send corrections to *sanskrit@cheerful.com*